| | ङं | निमेष " | शिवायै | " |
| | चं | श्वास " | अपर्णायै | " |
| | छं | घटिका " | अम्बिकायै | " |
| | जं | मुहूर्त " | सत्यै | " |
| | झं | प्रहर " | ईश्वर्यै | " |
| | ञं | दिवस " | शाम्भव्यै | " |
| | टं | सन्ध्या " | ईशान्यै | " |
| | ठं | रात्रि " | पार्वत्यै | " |
| | डं | तिथि " | सर्वमङ्गलायै | " |
| | ढं | वार " | दाक्षायण्यै | " |
| | णं | नक्षत्र " | हैमवत्यै | " |
| | तं | योग " | महामायायै | " |
| | थं | करण " | महेश्वर्यै | " |
| | दं | पक्ष " | मृडान्यै | " |
| | धं | मास " | रुद्राण्यै | " |
| | नं | राशि " | शर्वाण्यै | " |
| | पं | ऋतु " | परमेश्वर्यै | " |
| | फं | अयन " | काल्यै | " |
| | बं | वत्सर " | कात्यायन्यै | " |
| | भं | युग " | गौर्यै | " |
| | मं | प्रलय " | भवान्यै | " |

| | | | | |
|---|---|---|---|---|
| ओं ऐं क्लीं श्रीं ह्सौः ह्सौः | यं | पञ्चभूतरूपायै | ब्राह्म्यै | नमः |
| " | रं | पञ्चतन्मात्ररूपायै | वागीश्वर्यै | " |
| " | लं | पञ्चकर्मेन्द्रियरूपायै | वाण्यै | " |
| " | वं | पञ्चज्ञानेन्द्रियरूपायै | सावित्र्यै | " |
| " | शं | पञ्चप्राणरूपायै | सरस्वत्यै | " |
| " | षं | गुणत्रयरूपायै | गायत्र्यै | " |
| " | सं | अन्तःकरणचतुष्टयरूपायै | वाक्प्रदायै | " |
| " | हं | अवस्थाचतुष्टय " | शारदायै | " |
| " | ळं | सप्तधातुरूपायै | भारत्यै | " |
| " | क्षं | दोषत्रयरूपायै | विद्यात्मिकायै | नमः |

इत्येकपञ्चाशच्छक्तीः मातृकास्थानेषु विन्यस्य - ततः

ओं.... ६.... अकारादि क्षकारान्तां मातृकामुच्चार्य

सकलप्रपञ्चाधिदेवतायै श्रीपराम्बादेव्यै नमः

ह्सौः ह्सौः श्रीं ह्रीं ऐं ओं - सर्वाङ्गे व्यापकं कुर्यात्

इति प्रपञ्चन्यासः

## भुवनन्यासः

तत्र- पादयोः - ६-अं आं इं अतललोकनिलयशतकोटिगुह्याद्ययोगिनीमूलदेवतायुता-
धारशक्त्यम्बादेव्यै नमः

गुल्फयोः- ६ ईं उं ऊं वितललोकनिलयशतकोटिगुह्यतरानन्तयोगिनी
मूलदेवतायुताधारशक्त्यम्बादेव्यै नमः

जङ्घयोः - ६- ऋं ॠं लृं सुतललोकनिलयशतकोटि अतिगुह्याचिन्त्ययोगिनी.....

जान्वोः - ६, लॄं एं ऐं महातललोकनिलयशतकोटिमहागुह्यस्वतन्त्रयोगिनी...

ऊर्वोः ६ ओं औं तलातललोकनिलयशतकोटिपरमगुह्येच्छायोगिनी-

स्फिचो: ६ अं अः रसातललोकनिलयशतकोटिरहस्यज्ञानयोगिनीमूलदेवाद्युता-
धारशक्त्यम्बादेव्यै नमः

मूलाधारे ६ कं...ङं पाताललोकनिलयशतकोटिरहस्यतरक्रियायोगिनी मूलदेव...

स्वाधिष्ठाने ६ चं...ञं भूर्लोकनिलयशतकोटिअतिरहस्यडाकिनीयोगिनी......

मणिपूरके ६ टं...णं भुवर्लोकनिलयशतकोटिमहारहस्यराकिनीयोगिनी.......

अनाहते ६ तं...नं स्वर्लोकनिलयशतकोटिपरमरहस्यलाकिनीयोगिनी...

विशुद्धौ ६ पं....मं महर्लोकनिलयशतकोटिगुप्तकाकिनीयोगिनी........

आज्ञायां ६ यं....वं जनोलोकनिलयशतकोटिगुप्ततरसाकिनीयोगिनी......

ललाटे ६ शं...हं तपोलोकनिलयशतकोटिअतिगुप्तहाकिनीयोगिनी......

ब्रह्मरन्ध्रे ६ ळं क्षं सत्यलोकनिलयशतकोटिमहागुप्तयाकिनीयोगिनी...

इति विन्यस्य

६ समस्तमातृकामुच्चार्य सकलभुवनाधिपायै श्रीपराम्बादेव्यै नमः
ह्सौः ह्स्रौः श्रीं ह्रीं ऐं ओं इति व्यापकं कुर्यात्

इति भुवनन्यासः

## मूर्तिन्यासः

तत्र – शिरसि ६ अं केशवाय अभरशक्त्यै नमः

मुखे ६ आं नारायणाय आद्याशक्त्यै "

दक्षिणांसे ६ इं माधवाय इष्टदायै "

वामांसे ६ ईं गोविन्दाय ईशान्यै "

दक्षपार्श्वे ६ उं विष्णवे उग्रायै "

वामपार्श्वे ६ ऊं मधुसूदनाय ऊर्ध्वनयनायै "

दक्षकट्यां ६ ऋं त्रिविक्रमाय ऋद्ध्यै "

वामकट्यां ६ ॠं वामनाय रूपिण्यै " ...

दक्षोरौ ६ लृं श्रीधराय लुप्तायै नमः
वामोरौ " ॡं हृषीकेशाय लूनदोषायै "
दक्षजानुनि " एं पद्मनाभाय एकनायिकायै नमः
वामजानुनि " ऐं दामोदराय ऐकारिण्यै नमः
दक्षजंघायां " ओं वासुदेवाय ओघवत्यै "
वामजंघायां " औं संकर्षणाय और्वकाम्यायै "
दक्षपादे " अं प्रद्युम्नाय अञ्जनप्रभायै "
वामपादे " अः अनिरुद्धाय अस्थिमालाधरायै नमः
दक्षपादाग्रादूरुमूलपर्यन्तं ६ कं भं भवाय करभद्रायै नमः
वाम " " " " " खं बं शर्वाय खगवलायै "
दक्षपार्श्वे ६ गं फं रुद्राय गरिमफलप्रदायै "
वामपार्श्वे ६ घं पं पशुपतये घोरपादायै "
दक्षदोर्मूले ६ ङं नं उग्राय पङ्क्तिनासायै "
वामदोर्मूले ६ चं धं महादेवाय चन्द्रार्धधारिण्यै "
कण्ठे ६ छं दं भीमाय छन्दोमय्यै "
वदने ६ जं थं ईशानाय जगत्स्थानायै "
दक्षकर्णे ६ झं तं तत्पुरुषाय झंकृत्यै "
वामकर्णे ६ ञं णं अघोराय ज्ञानदायै "
भाले ६ टं ढं सद्योजाताय टङ्कटङ्कधरायै "
शिरसि ६ ठं डं वामदेवाय ठंकृतिकामयै "
मूलाधारे ६ यं ब्रह्मणे यक्षिण्यै "
स्वाधिष्ठाने ६ रं प्रजापतये रक्षिन्यै "
मणिपूरके ६ लं वेधसे लक्ष्म्यै "
अनाहते ६ वं परमेष्ठिने वज्रिण्यै "
विशुद्धौ ६ शं पितामहाय शशिधरायै "

आज्ञायां ६ षं विधात्रे षडाधारालयायै नमः
अर्द्धेन्दौ " सं विरिञ्चये सर्वनायिकायै "
रोधिन्यां " हं स्रष्ट्रे हसितानानायै "
नादे " ळं चतुराननाय ललितायै "
नादान्ते " क्षं हिरण्यगर्भाय क्षमायै "

इति विन्यस्य

६ सकलमातृकामुच्चार्य सकलत्रिमूर्त्यात्मिकायै श्रीपराम्बादेव्यै नमः
ह्सौः ह्स्रौः श्रीं ह्रीं ऐं ओं इति व्यापकं कुर्यात् ॥

इति मूर्तिन्यासः

## मन्त्र न्यासः

मूलाधारे ६ अं आं इं एकलक्षकोटिभेद प्रणवाद्येकाक्षरात्मकाखिल मंत्राधिदेवतायै सकलफलप्रदायै एककूटेश्वर्यम्बादेव्यै नमः

स्वाधिष्ठाने ६ ईं उं ऊं द्विलक्षकोटिभेद हंसादि द्व्यक्षरात्मिकाखिल मन्त्राधिदेवतायै सकलफलप्रदायै द्विकूटेश्वर्यम्बादेव्यै नमः

मणिपूरके ६ ऋं ॠं ऌं त्रिलक्षकोटिभेद वन्ह्यादि त्र्यक्षरात्मिकाखिलमंत्राधिदेवतायै सकलफलप्रदायै त्रिकूटेश्वर्यम्बादेव्यै नमः

अनाहते ६ ॡं एं ऐं चतुर्लक्षकोटिभेद चन्द्रादि चतुरक्षरात्मिकाखिलमंत्राधि-देवतायै सकलफलप्रदायै चतुष्कूटेश्वर्यम्बादेव्यै नमः

विशुद्धौ ६ ओं औं अं अः पञ्चलक्षकोटिभेद सूर्यादि पञ्चाक्षरात्मिकाखिलमंत्राधिदेवतायै सकलफलप्रदायै पञ्चकूटेश्वर्यम्बादेव्यै नमः

आज्ञायां ६ कं...गं षड्लक्षकोटिभेद स्कन्दादि षडक्षरात्मिकाखिलमंत्राधि-देवतायै सकलफलप्रदायै षट्कूटेश्वर्यम्बादेव्यै नमः

बिन्दौ ६ घं ङं चं सप्तलक्षकोटिभेदगणपत्यादिसप्ताक्षरात्मिकाखिल
मन्त्राधिदेवतायै सकलफलप्रदायै सप्तकूटेश्वर्यम्बादेव्यै.
अर्द्धचन्द्रौ ६ छं जं झं अष्टलक्षकोटि(भेद)वटुकाद्यष्टाक्षरात्मिकाखिलमन्त्राधि-
देवतायै सकलफलप्रदायै अष्टकूटेश्वर्यम्बादेव्यै नमः
रोधिन्यां ६ ञं टं ठं नवलक्षकोटिभेद ब्रह्मादिनवाक्षरात्मिकाखिलमन्त्राधि-
देवतायै सकलफलप्रदायै नवकूटेश्वर्यम्बा देव्यै नमः
नादे ६ डं ढं णं दशलक्षकोटिभेदविष्ण्वादिदशाक्षरात्मिकाखिलमन्त्राधिदेवतायै
सकलफलदायै दशकूटेश्वर्यम्बादेव्यै नमः
नादान्ते ६ तं थं दं एकादशलक्षकोटिभेदरुद्राद्येकादशाक्षरात्मकाखिलमन्त्रदेव-
तायै सकलफलप्रदायै एकादशकूटेश्वर्यम्बादेव्यै नमः
शक्तौ ६ धं नं पं द्वादशलक्षकोटिभेदवाण्यादिद्वादशाक्षरात्मकाखिलमन्त्र-
देवतायै सकलफलप्रदायै द्वादशकूटेश्वर्यम्बादेव्यै नमः
व्यापिकायां ६ फं बं भं त्रयोदशलक्षकोटिभेदलक्ष्म्यादित्रयोदशाक्षरात्मकाखिल
मन्त्राधिदेवतायै सकलफलप्रदायै त्रयोदशकूटेश्वर्यम्बादेव्यै नमः
समनस्थाने ६ मं यं रं चतुर्दशलक्षकोटिभेदगौर्यादि चतुर्दशाक्षरात्मकाखिलमन्त्राधि
देवतायै सकलफलप्रदायै चतुर्दशकूटेश्वर्यम्बादेव्यै नमः
उन्मनायां ६ लं वं शं पञ्चदशलक्षकोटिभेद दुर्गादिपंचदशाक्षरात्मकाखिलमन्त्राधि
देवतायै सकलफलप्रदायै पञ्चदशकूटेश्वर्यम्बा देव्यै नमः
ध्रुवमण्डले ६ षं सं हं ळं क्षं षोडशलक्षकोटिभेद त्रिपुरादिषोडशाक्षरात्मका-
खिलमंत्राधिदेवतायै सकलफलप्रदायै षोडशकूटेश्वर्यम्बा देव्यै नमः

ततः,

६ सकलमातृकामुच्चार्य सकलमन्त्राधिदेवतायै श्रीपराम्बा-
देव्यै नमः ह्स्यौः ह्सौंः श्रीं ह्रीं एं ओं इति व्यापकं
कुर्यात् ॥

इति मन्त्रन्यासः

# देवतान्यास:

तत्र- दक्षपादे ओं ऐं ह्रीं श्रीं ह्सौं ह्सौः अं आं सहस्रकोटि ऋषिकुलसेवितायै निवृत्याचारदेव्यै नमः

वामपादे ६ इं ईं सहस्रकोटि योगिनीकुलसेवितायै प्रतिष्ठाम्बा " "

दक्षगुल्फे ६ उं ऊं सहस्रकोटि-तपस्विनी " " विद्याम्बा " "

वामगुल्फे ६ ऋं ॠं सहस्रकोटि शान्त कुलसेवितायै शान्ताम्बा देव्यै नमः

दक्षजंघायां ६ लृं ॡं " मुनिकुल सेवितायै शान्त्यतीताम्बा " "

वामजंघायां ६ एं ऐं " दैवत " " हृल्लेखाम्बा " "

दक्षजानुनि ६ ओं औं " राक्षस " " गगनाम्बा " "

वामजानुनि ६ अं अः " विद्याधर " " रक्तांबा " "

दक्षोरौ ६ कं खं " सिद्ध " " महोच्छुष्माम्बा " "

वामोरौ ६ गं घं " साध्य कुल " करालिका " " "

दक्षोरुमूले ६ ङं चं " अप्सरः " " जयाम्बा " "

वामोरुमूले ६ छं जं " गन्धर्व " " विजयाम्बा " "

दक्षपार्श्वे ६ झं ञं " गुह्यक " " अजिताम्बा " "

वामपार्श्वे ६ टं ठं " यक्ष " " अपराजिताम्बा " "

दक्षस्तने ६ डं ढं " किन्नर " " वामाम्बा " "

वामस्तने ६ णं तं " पन्नग " " ज्येष्ठाम्बा " "

दक्षदोर्मूले ६ थं दं " पितृ " " रौद्र्यम्बा " "

वामदोर्मूले ६ धं नं " गणेश्वर " " मायाम्बा " "

दक्षभुजे ६ पं फं " भैरव " " कुण्डलिन्यम्बा " "

वामभुजे ६ बं भं " वटुक " " काल्यम्बा " "

दक्षांसे ६ मं यं " क्षेत्रेश " " कालरात्र्यम्बा " "

वामांसे ६ रं लं " प्रमथ " " भगवत्यम्बा " "

दक्षकर्णे ६ वं शं " ब्रह्म " " सर्वेश्वर्यम्बा " "

वामकर्णे ओं ऐं ह्रीं श्रीं ह्सौं ह्स्रौः षं सं सहस्रकोटिविष्णुकुलसेवितायै सर्वज्ञात्र्यम्बा देव्यै नमः
भाले " " " हं ळं सहस्रकोटिरुद्रकुलसेवितायै सर्वकर्त्र्यंबा देव्यै "
ब्रह्मरन्ध्रे " " " क्षं सहस्रकोटिचराचरकुलसेवितायै कुलशाक्त्यंबा " "

ततः

६ सकलमातृकामुच्चार्य समस्तदेवताधिपायै श्रीपराम्बा " "
ह्सौः ह्स्रौः श्रीं ह्रीं ऐं ओं इति व्यापकं कुर्यात्
इति देवतान्यासः

## मातृका न्यासः

तत्र मूलाधारे ६ कं खं गं घं ङं अनन्तकोटि भूचरीकुलसहितायै आं क्षां
मंगलाम्बादेव्यै आं क्षां ब्रह्माण्यम्बादेव्यै अनन्तकोटि
भूचराकुलसहिताय अं क्षं मङ्गलनाथाय अं क्षं
असितांगभैरवनाथाय नमः चर्चिकाम्बादेव्यै, ईं ळं
स्वाधिष्ठाने ६ चं ..... ञं अनन्तकोटि खेचरीकुलसहितायै ईं ळां ...
माहेश्वर्यम्बा देव्यै अनन्तकोटिदेवता कुलसहिताय
इं ळं चर्चिकानाथाय इं ळं रुरुभैरवनाथाय नमः
मणिपूरके ६ टं ....णं अनन्तकोटिपातालचरीकुलसहितायै ऊं हां
कौमार्यम्बादेव्यै अनन्तकोटिपिशाचकुलसहिताय
उं हं योगेश्वरनाथाय उं हं चण्डभैरवनाथाय नमः
अनाहते ६ तं ... नं अनन्तकोटिदिक्चरीकुलसहितायै ऋ सां (ऋं सं हरसिद्धाम्बादेव्यै)
वैष्णव्यम्बादेव्यै अनन्तकोटिचपस्मारकुल सहिताय
ऋं सं हरसिद्धनाथाय ऋं सं क्रोधभैरवाय नमः
विशुद्धौ ६ पं.... मं अनन्तकोटि सहचरीकुलसहितायै ॡं षां
भद्रिन्यंबादेव्यै ॡं षां वाराह्यंबादेव्यै अनन्तकोटि

ब्रह्मराक्षसकुलसहिताय लं षं भद्रिनाथाय लं वं उन्मत्तभैरवाय नमः

आज्ञायां ६ यं...वं अनन्तकोटिगिरिचरीकुलसहितायै ऐं ड्रां किलिकिलम्बादेव्यै ऐं ड्रां इन्द्राण्यम्बादेव्यै अनन्तकोटि चेटककुलसहिताय ऐं ड्रां किलिकिलनाथाय ऐं ड्रां कपालिभैरवनाथाय नमः

भाले ६ शं...हं अनन्तकोटिवनचरीकुलसहितायै औं वां कालरात्र्यंबादेव्यै औं वां चामुण्डाम्बादेव्यै अनन्तकोटि प्रेतकुलसहिताय औं वां कालरात्रिनाथाय औं वं भीषणभैरवनाथाय नमः

ब्रह्मरन्ध्रे ६ ळं क्षं अनन्तकोटि जलचरीकुलसहितायै अः लां भीषणांबादेव्यै अः लां महालक्ष्म्यम्बादेव्यै अनन्तकोटिकूष्मांडकुलसहिताय अः लं भीषणनाथाय अं लं संहारभैरवनाथाय नमः॥

ततः

६ समस्तमातृकामुच्चार्य समस्तमातृकाभैरवाधिदेवतायै श्रीपरांबादेव्यै नमः हसौः ह्सौः श्रीं ह्रीं ऐं ओं इति व्यापकं कुर्यात्

इति मातृका न्यासः

## इति महाषोढान्यासः

ततः पूर्वोक्तैः ह्सां हसीं इत्यादिभिः करषडङ्गन्यासं विधाय देवं ध्यायेत्। यथा-
अमृतार्णवमध्योद्यत्स्वर्णद्वीपे मनोरमे। कल्पवृक्षवनान्तःस्थे नवमाणिक्यमण्डपे।
नवरत्नमय श्रीमत्सिंहासनगताम्बुजे। त्रिकोणान्तःसमासीनं चन्द्रसूर्यायुतप्रभम्।
अर्धाम्बिकासमायुक्तं प्रविभक्तविभूषणम्। कोटिकन्दर्पलावण्यं सदा षोडशवार्षिकम्॥
मन्दस्मितमुखाम्भोजं त्रिनेत्रं चन्द्रशेखरम्। दिव्यांबरस्रगालेपं दिव्याभरणभूषितम्॥
पानपात्रं च चिन्मुद्रां त्रिशूलं पुस्तकं करैः। बिभ्राणं सदा बिभ्राणं सदानन्दमुखेक्षणम्।
महाषोढोदिताशेषदेवतागणसेवितम्। एवं चित्तांबुजे ध्यायेदर्धनारीश्वरं शिवम्।
पुरुषं वा स्मरेद्देवि स्त्रीरूपं वा विचिन्तयेत्। अथवा निष्कलं ध्यायेत्सच्चिदानन्दलक्षणम्
सर्वतेजोमयं ध्यायेत् सचराचरविग्रहम्॥

इति स्वाभेदेन ध्यात्वा योनिलिंगसुरभिकपालज्ञानत्रिशूलपुस्तकवनमालाजभो-

महामुद्रा इति दश मुद्रा विरच्य शिरसि श्रीगुरुं ध्यायेत्। यथा –

सहस्रदलपंकजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धपुष्पांबरम्।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि हंसगं तदभिधानपूर्वं गुरुम्॥

इति श्रीगुरुं ध्यात्वा। तद्दिव्यया तत्पादुकां शिरसि विन्यस्य प्रणम्य स्वगुरुकृतं स्वनाम स्वमूलाधारे स्मृत्वा शिवरूपं स्वात्मानं ध्यायेत्॥

— अथ महाषोढान्यासफलं कुलार्णवे –

एवं न्यासे कृते देवि साक्षात्परशिवो भवेत्। मन्त्री न चात्र सन्देहो निग्रहानुग्रहक्षमः
महाषोढाह्वयं न्यासं यः करोति दिने दिने। देवाः सर्वे नमस्यन्ति तं नमामि न संशयः
महाषोढाह्वयं न्यासं यत्र मन्त्री न्यसेत्ततः। दिव्यक्षेत्रं समुद्दिष्टं समन्ताद्दशयोजनम्।
कृत्वा न्यासमिमं देवि यत्र गच्छति मानवः। तत्र श्रीर्विजयो लाभः सम्मान्यः पुरुषः प्रिये
महाषोढाकृतन्यासः त्वद्दीक्षायाभिवन्दिते। समासान्मृत्युमाप्नोति यदि त्राता शिवः स्वयं
वज्रपंजरनामानमेवं न्यासं करोति यः। दिव्यान्तरिक्षभूशैलजलारण्यनिवासिनः॥
उद्दण्डभूतवेतालदेवरक्षोग्रहादयः। भयग्रस्तेन मनसा नेक्षन्ते साधकं प्रिये॥
महाषोढाह्वयं न्यासं ब्रह्मविष्णुशिवादयः। देवाः सर्वे प्रकुर्वन्ति ऋषयश्च मुनीश्वराः॥
बहुनोक्तेन किं देवि सुशिष्याय प्रकाशयेत्। अभयां लभते सिद्धिं रहसि न्यासमाचरेत्
अस्मात्परतरः साक्षाद्देवताभावसिद्धिदः। लोके नास्ति न संदेहः सत्यं सत्यं न संशयः
ऊर्ध्वाम्नायप्रवेशश्च पराप्रासादचिन्तनम्। महाषोढापरिज्ञानं नाल्पस्य तपसः फलम्

इत्थं
महाषोढान्यासं विधाय

त्रिविधः

# श्री चक्र न्यासः

श्रीं गुं गुरुभ्यो नमः
श्रीं गं गणपतये नमः

प्राणानायम्य मूलेन कध्यादि न्यासमाचरेत्। ध्यात्वा संपूज्य देहं स्वं ध्यायेच्छ्रीचक्र-
शरीरं चिन्तयेदादौ निजं श्रीचक्र रूपिणं। त्वगाद्याकार निर्मुक्तं ज्वलत्कालाग्नि संनिभम्॥ [इत्युक्तम्]
पृथ्वीपुरत्रितयभूमिस्पत्रनागपत्रेन्द्र कोणदश कोण युगे भ कोणम्
अन्तस्त्रिकोणमथ बिन्दुपदं समीक्ष्य श्रीचक्रराजमहलं विमृडोत्स्वदेहम्
एवं प्राणानायम्य श्रीमूलविद्यया एव कध्यादि करषडङ्गन्यासं
कृत्वा देवीं ध्यात्वा संपूज्य च स्वदेहं श्रीचक्र रूपिणं ध्यात्वा न्यसेत्॥ यथा

ॐ लं इन्द्राय नमः इति दक्षपादाङ्गुष्ठे
रं अग्नये " " दक्षजानुनि
टं यमाय " " दक्षपार्श्वे
क्षं नैर्ऋतये " " दक्षांसे
वं वरुणाय " " वामांसे
यं वायवे " " वामपार्श्वे
सं सोमाय " " वामजानुनि
ईं ईशानाय " " वामपादाङ्गुष्ठे
ओं ब्रह्मणे " " ब्रह्मरन्ध्रे
श्रीं अनन्ताय " " मूलाधारे

इति दिग्बन्धनम्

गं गणेशाय नमः वामजानुनि
क्षं क्षेत्रपालाय " वामांसे
वं वटुकाय " दक्षजानुनि
यां योगिनीभ्यो " दक्षांसे - इति बलिदेवतान्यासः

## दशपीठशक्तिन्यासः

| | | | |
|---|---|---|---|
| ४ | मोहिन्यै | नमः | पादाङ्गुष्ठद्वये |
| | क्षोभिण्यै | " | दक्ष जानुनि |
| | वशिन्यै | " | दक्षकूर्परे |
| | स्तंभिन्यै | " | दक्षकराङ्गुल्यग्रे |
| | आकर्षिण्यै | " | विशाखायाम् |
| | द्राविण्यै | " | वामकराङ्गुल्यग्रे |
| | आह्लादिन्यै | " | वामकूर्परे |
| | क्लिन्नायै | " | वाम जानुनि |
| | क्लेदिन्यै | " | हृदि |

सर्वतत्त्वकमलासनाय नमः सर्वाङ्गे

## प्रथमावरणन्यासः

४ अं आं सौः त्रैलोक्यमोहनचक्राय नमः इति सर्वांगे व्यापकत्वेन विन्यस्य

४ बाह्यचतुरस्ररेखायै नमः इति आचूडचरणं वक्ष्यमाणेष्ववयवेषु व्यापकं न्यस्य

| | | | |
|---|---|---|---|
| ४ | अणिमासिद्ध्यै | नमः | दक्षांसपश्चाद्भागे |
| | लघिमा " | " | दक्षपाण्यंगुल्यग्रेषु |
| | महिमा " | " | दक्षोरुसन्धौ |
| | ईशित्व " | " | दक्षपादांगुल्यग्रेषु |
| | वशित्व " | " | वामपादांगुल्यग्रेषु |
| | प्राकाम्य " | " | वामोरुसन्धौ |
| | भुक्ति " | " | वामपाण्यङ्गुल्यग्रेषु |
| | इच्छा " | " | वामांसपृष्ठे |
| | प्राप्ति " | " | शिखामूले |
| | सर्वकाम " | " | शिरः पृष्ठे |

तदन्तः चतुरस्रमध्यरेखायै नमः इति वक्ष्यमाणेष्वंगेषु व्यापकं न्यस्य -

| | | | |
|---|---|---|---|
| ४ | ब्राह्म्यै | नमः | पादाङ्गुष्ठद्वये |
| | माहेश्वर्यै | " | दक्षपार्श्वे |
| | कौमार्यै | " | शिरसि |
| | वैष्णव्यै | " | वामपार्श्वे |
| | वाराह्यै | " | वामजानुनि |
| | इन्द्राण्यै | " | दक्षजानुनि |
| | चामुण्डायै | " | दक्षांसे |
| | महालक्ष्म्यै | " | वामांसे |

तदन्तः चतुरस्रान्त्यरेखायै नमः इति वक्ष्यमाणेष्वंगेषु व्यापकं न्यस्य-

| | | | |
|---|---|---|---|
| ४ द्रां | सर्वसंक्षोभिण्यै मुद्रायै | नमः | पादांगुष्ठद्वये |
| द्रीं | सर्वविद्राविण्यै | " | दक्षपार्श्वे |
| क्लीं | सर्वाकर्षिण्यै | " | शिरसि |
| ब्लूं | सर्ववशंकर्यै | " | वामपार्श्वे |
| सः | सर्वोन्मादिन्यै | " | वामजानुनि |
| क्रों | सर्वमहाङ्कुशायै | " | दक्षजानुनि |
| ह्स्ख्फ्रें | सर्वखेचर्यै | " | दक्षांसे |
| ह्सौः | सर्वबीजायै | " | वामांसे |
| ऐं | सर्वयोनये | " | द्वादशान्ते |
| ४ ह्स्रैं ह्स्क्ल्रीं ह्स्रौः | सर्वत्रिखण्डायै | " | पादांगुष्ठद्वये |

अं आं सौः त्रैलोक्यमोहनचक्रेश्वर्यै त्रिपुरायै नमः हृदये

तस्या दक्षिणे ४ अणिमासिद्ध्यै नमः ४ द्रां सर्वसंक्षोभिण्यै मुद्रायै नमः इति तस्या वामे इति विन्यस्य ४ एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः सन्तु नमः इति व्यापकं विन्यसेत् ॥

## द्वितीयावरणन्यासः

४ ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय (षोडशदलकमलाय) नमः इति व्यापकं विन्यस्य

| | | | | |
|---|---|---|---|---|
| ४ अं | कामाकर्षिणीनित्याकलायै | | नमः | दक्षिणकर्णपृष्ठे |
| आं | बुद्ध्याकर्षिणी | " | " | दक्षांसे |
| इं | अहंकाराकर्षिणी | " | " | दक्षकूर्परे |
| ईं | शब्दाकर्षिणी | " | " | दक्षकरपृष्ठे |
| उं | स्पर्शाकर्षिणी | " | " | दक्षिणोरौ |
| ऊं | रूपाकर्षिणी | " | " | दक्षजानुनि |
| ऋं | रसाकर्षिणी | " | " | दक्षगुल्फे |
| ॠं | गन्धाकर्षिणी | " | " | दक्षपादतले |
| ऌं | चित्ताकर्षिणी | " | " | वामपादतले |
| ॡं | धैर्याकर्षिणी | " | " | वामगुल्फे |
| एं | स्मृत्याकर्षिणी | " | " | वामजानुनि |
| ऐं | नामाकर्षिणी | " | " | वामोरौ |
| ओं | बीजाकर्षिणी | " | " | वामकरपृष्ठे |
| औं | आत्माकर्षिण्यै | " | " | वामकूर्परे |
| अं | अमृताकर्षिण्यै | " | " | वामांसे |
| अः | शरीराकर्षिण्यै | " | " | वामश्रोत्रपृष्ठे |

४ ऐं क्लीं सौः सर्वाशापरिपूरकचक्रेश्वर्यै त्रिपुरेश्यै नमः इति हृदये
तस्या दक्षिणे ४ लघिमासिद्ध्यै नमः
वामे " द्रीं सर्वविद्राविणीमुद्रायै नमः इति विन्यस्य
४ एताः गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः संपूजिताः न्यस्ताः सन्तु नमः इति व्यापकं न्यसेत् ॥

## तृतीयावरणन्यासः

४ ह्रीं क्लीं सौः अष्टदलपद्माय सर्वसंक्षोभणचक्राय नमः इति व्यापकं विन्यस्य

४ कं....ङं अनङ्गकुसुमायै नमः इति दक्षशंखे
चं... ञं अनङ्गमेखलायै " दक्षजत्रुणि (बाहुमूलसन्धौ)
टं.....णं अनङ्गमदनायै " दक्षोरौ
तं...नं अनङ्गमदनातुरायै " दक्षगुल्फे
पं.... मं अनङ्गरेखायै " वामगुल्फे
यं...वं अनङ्गवेगिन्यै " वामोरौ
शं... हं अनङ्गाङ्कुशायै " वामजत्रुणि
ळं क्षं अनङ्गमालिन्यै " वामांसे

४ ह्रीं क्लीं सौः सर्वसंक्षोभणचक्रेश्वर्यै त्रिपुरसुन्दर्यै नमः इति हृदये।
तस्या दक्षिणे ४ महिमासिद्ध्यै नमः
वामे ४ क्लीं सर्वाकर्षिणीमुद्रायै नमः इति विन्यस्य

४ एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणे चक्रे समुद्राःससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः सन्तु इति व्यापकं कुर्यात्।

## चतुर्थावरणन्यासः

४ हैं हक्लीं हसौः चतुर्दशारचक्राय सर्वसौभाग्यदायकचक्राय नमः इति व्यापकं विन्यस्य

४ कं सर्वसंक्षोभिणीशक्त्यै नमः ललाटदक्षभागे
खं सर्वविद्राविणी " " दक्षगण्डे
गं सर्वाकर्षिणी " " दक्षांसे

४ घं सर्वाह्लादिनी शक्त्यै नमः दक्षपार्श्वे
ङं सर्वसंमोहिनी " " दक्षोरौ
चं सर्वस्तंभिनी " " दक्षजंघायाम्
छं सर्वजृंभिणी " " वामजंघायाम्
जं सर्ववशंकरिणी " " वामोरौ
झं सर्वरंजिनी " " वामपार्श्वे
ञं सर्वोन्मादकरिणी " " वामांसे
टं सर्वार्थसाधिनी " " वामगण्डे
ठं सर्वसंपत्तिपूरिणी " " ललाटवामभागे
डं सर्वमन्त्रमयी " " ललाटे
ढं सर्वद्वन्द्वक्षयंकरी " " चूडाधः शिरः पृष्ठे वा इतिविन्यस्य

४ हैं हक्लीं हसौः त्रिपुरवासिनी सर्वसौभाग्यदायकचक्रेश्वर्यै नमः इति हृदये
तस्या दक्षिणे ४ श्रीं ईशित्वसिद्ध्यै नमः
" वामे ४ क्लूं सर्ववशंकरीमुद्रायै नमः इति विन्यस्य
४ एताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः सन्तु नमः इति व्यापकं कुर्यात् ॥

## पञ्चमावरणन्यासः

४ ह्रैं हक्लीं ह्सौः बहिर्दशार चक्राय सर्वार्थसाधकचक्राय नमः इतिव्यापकं विन्यस्य
४ णं सर्वसिद्धिप्रदादेव्यै नमः दक्षनेत्रे
तं सर्वसंपत्प्रदादेव्यै " नासामूले
थं सर्वप्रियंकरीदेव्यै " वामनेत्रे
दं सर्वमङ्गलकारिणीदेव्यै " वामबाहुमूले
धं सर्वकामप्रदादेव्यै " वामोरुमूले

४ नं सर्वदुःखविमोचिनी देव्यै नमः वामजानुनि
पं सर्वमृत्युप्रशमनी देव्यै " दक्षजानुनि
फं सर्वविघ्नविनाशिदेव्यै " गुदे
बं सर्वाङ्गसुन्दरी देव्यै " दक्षोरुमूले
भं सर्वसौभाग्यदायिनी देव्यै " दक्षबाहुमूले

इति विन्यस्य

४ हैं ह्स्क्लीं ह्सौः त्रिपुराश्रियै सर्वार्थसाधकचक्रेश्वर्यै नमः हृदि। तस्याः
दक्षिणे ४ वशित्वसिद्ध्यै नमः
वामे ४ सः सर्वोन्मादिनीमुद्रायै नमः इति विन्यस्य-

४ एताः कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः सन्तु नमः इति व्यापकं कुर्यात् ॥

## षष्ठावरणन्यासः

४ ह्रीं क्लीं ब्लें अन्तर्दशारचक्राय सर्वरक्षाकरचक्राय नमः इति व्यापकं विन्यस्य

४ मं सर्वज्ञा देव्यै नमः दक्षनासापुटे
यं सर्वशक्तिदेव्यै " दक्षसृक्किणि
रं सर्वैश्वर्यप्रदायिनीदेव्यै " दक्षस्तने
लं सर्वज्ञानमयीदेव्यै " दक्षमुष्के
वं सर्वव्याधिविनाशिनीदेव्यै " सीविन्यां
शं सर्वाधारस्वरूपादेव्यै " वाममुष्के
षं सर्वपापहरादेव्यै " वामस्तने
सं सर्वानन्दमयीदेव्यै " वामसृक्किणि
हं सर्वरक्षास्वरूपिणीदेव्यै " वामनासापुटे
क्षं सर्वेप्सितफलप्रदादेव्यै " नासाग्रे इति विन्यस्य

४ ह्रीं क्लीं ब्लें त्रिपुरमालिनी सर्वरक्षाकरचक्रेश्वर्यै नमः हृदये। तस्याः
दक्षिणे ४ प्राकाम्यसिद्ध्यै नमः
वामे ४ क्रों महाङ्कुशामुद्रायै नमः इति विन्यस्य
४ एताः निगर्भयोगिन्यः सर्वरक्षाकरचक्रे समुद्राः ससिद्धयः
सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः
सन्तु नमः इति व्यापकं कुर्यात् ॥

## सप्तमावरणन्यासः

४ ह्रीं श्रीं सौः अष्टकोणचक्राय सर्वरोगहरचक्राय नमः इति व्यापकं विन्यस्य

| | | | |
|---|---|---|---|
| ४ अं...... अः ब्लूं | वशिनी वाग्देवतायै | नमः | चुबुके |
| कं.....ङं कल्ह्रीं | कामेश्वरीवाग्देवतायै | " | कण्ठदक्षिणभागे |
| चं.....ञं न्व्लीं | मोदिनीवाग्देवतायै | " | हृदयदक्षिणभागे |
| टं....णं ट्लूं | विमलावाग्देवतायै | " | दक्षिणकुक्षौ |
| तं....नं ज्म्रीं | अरुणावाग्देवतायै | " | नाभौ |
| पं... मं ह्स्ल्व्यूं | जयिनीवाग्देवतायै | " | वामकुक्षौ |
| यं....वं झ्म्र्यूं | सर्वेश्वरी वाग्देवतायै | " | हृदयवामभागे |
| ४ शं....क्षं क्ष्म्रीं | कौलिनीवाग्देवतायै | " | कण्ठवामभागे इति विन्यस्य |

४ ह्रीं श्रीं सौः त्रिपुरासिद्धा सर्वरोगहरचक्रेश्वर्यै नमः हृदये। तस्याः-
दक्षिणे ४ भुक्तिसिद्ध्यै नमः
वामे ४ ह्स्ख्फ्रें सर्वखेचरीमुद्रायै नमः इति विन्यस्य-
४ एताः रहस्ययोगिन्यः सर्वरोगहरेचक्रे समुद्राः ससिद्धयः
सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः
सन्तु नमः इति व्यापकं कुर्यात् ॥

# अष्टमावरणन्यासः

ॐ ह्सैं ह्स्क्ल्रीं ह्सौः मध्यत्रिकोणाय सर्वसिद्धिप्रदचक्राय नमः इति व्यापकं विन्यस्य हृदयं त्रिकोणत्वेन विभाव्य ॥ तद्यथा ॥ कण्ठमध्याधः प्रदेशाद् दक्षवामस्तनवितः पुनः तत्स्थानपर्यन्तं मध्यत्र्यस्रं विभावयित्वा तस्य बहिः दक्षवाम-वामदक्षेषु ॐ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां सर्वजृम्भणेभ्यो कामेश्वरकामेश्वरीबाणेभ्यो नमः

ॐ थं धं सर्वसंमोहनाभ्यां कामेश्वरकामेश्वरीचापाभ्यां नमः

ॐ ह्रीं आं सर्ववशीकरणाभ्यां कामेश्वरकामेश्वरीपाशाभ्यां नमः

ॐ क्रों क्रों सर्वस्तंभनाभ्यां कामेश्वरकामेश्वरीअंकुशाभ्यां नमः

ॐ कएईलह्रीं अग्निचक्रे कामगिरिपीठे मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठायिने इच्छाशक्त्यात्मक रुद्रात्मकशक्ति श्रीकामेश्वरीदेव्यै नमः इति त्रिकोणस्याग्रकोणे ॥

ॐ हसकहलह्रीं सूर्यचक्रे जालंधरपीठे षष्ठीशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मक विष्ण्वात्मक शक्ति श्रीवज्रेश्वरीदेव्यै नमः त्रिकोणस्य वामकोणे ॥

ॐ सकलह्रीं सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मक ब्रह्मात्मक शक्ति श्री भगमालिनी देव्यै नमः दक्षकोणे ॥ इति विन्यस्य

ॐ ह्स्त्रैं ह्स्क्ल्रीं ह्सौः त्रिपुराम्बिकासर्वसिद्धिप्रदचक्रेश्वर्यै नमः हृदये ॥

तस्या दक्षिणे ॐ श्रीं इच्छासिद्ध्यै नमः

वामे ॐ ह्सौं सर्वबीजमुद्रायै नमः इति विन्यस्य

ॐ एताः परापररहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्ताः सन्तु नमः इति व्यापकं कुर्यात् ॥

# नवमावरणन्यासः

४ ह्सकल ह्सकहल सकलह्रीं बिन्दुपीठाय सर्वानन्दमय-
चक्राय नमः इति व्यापकं विन्यस्य, हृदय त्रिकोण
मध्यस्थितबिन्दुमध्ये

४ हसकल हसकहल सकलह्रीं ब्रह्मचक्रे उड्यानपीठे
श्रीचर्यानाथात्मके तुरीयतुरीयातीतदशाधिष्ठायके
परब्रह्मात्मशक्ति श्रीमहात्रिपुरसुन्दर्यै देव्यै नमः

४ कएइलह्रीं हसकहलह्रीं सकलह्रीं महात्रिपुरसुन्दरी श्री सर्वानन्दमय
चक्रेश्वर्यै नमः इति तत्रैव ॥ तस्या दक्षिणे ४ प्राप्तिसिद्ध्यै नमः
तस्या वामे ४ ऐं सर्वयोनिमुद्रायै नमः इति विन्यस्य

४ एषा परापरातिरहस्ययोगिनी सर्वानन्दमये महाचक्रे
परब्रह्मस्वरूपिणी परामृतशक्तिः सर्वमन्त्रेश्वरी सर्वविद्येश्वरी
सर्वपीठेश्वरी सर्ववीरेश्वरी सर्वयोगीश्वरी सर्ववागीश्वरी
सर्वसिद्धेश्वरी सकलजगदुत्पत्तिमातृका सचक्रा
सदेवता समुद्रा ससिद्धा सायुधा सासना सवाहना
सपरिवारा सालंकारा सर्वोपचारैः श्रीमहात्रिपुरसुन्दरी
परया चापरया च सपर्यया संपूजिता न्यस्ता अस्तु नमः
इति व्यापकं कुर्यात् ॥

अतः पश्चादुक्तौ न्यासक्रमः श्रीषोडश्युपासकैरेव कार्यः नत्वन्यैः ॥

पुनः हृदये एव ४ मूलसमस्तचक्रेश्वरी महात्रिपुरसुन्दर्यै देव्यै नमः
तस्याः दक्षिणे ४ सर्वकामसिद्ध्यै नमः

वामे ४ ह्स्रैं ह्स्क्ल्रीं ह्स्रौः सर्वत्रिखण्डामुद्रायै नमः

इति हृदये एव विन्यस्य हृदयत्रिकोणे कामेश्वर्याद्याः चित्रान्ताः पंचदशनित्या न्यसेत् । हृदि नित्या षोडशीमप्रदेशमपि । ६५ कृष्णपक्षे तु वक्ष्यमाण प्रकारेण उदयव्यापि तिथिनियमात्तिथिवृद्धौ दिनद्वये एका नित्या । तिथिक्षये नित्याद्वयमेकतिथौ ॥

| | |
|---|---|
| ४ अं कामेश्वरी नित्यायै नमः | ४ अं चित्रा नित्यायै नमः |
| आं भगमालिनी " | औं ज्वालामालिनी " |
| इं नित्यक्लिन्ना " | ओं सर्वमङ्गला " |
| ईं भेरुण्डायै " | ऐं विजया " |
| उं वह्निवासिनी " | एं नीलपताका " |
| ऊं महावज्रेश्वरी " | ॡं नित्यानित्या " |
| ऋं शिवदूती " | ऌं कुलसुन्दरी " |
| ॠं त्वरिता " | ॠं त्वरिता " |
| ऌं कुलसुन्दरी " | ऋं शिवदूती " |
| ॡं नित्यानित्या " | ऊं महावज्रेश्वरी " |
| एं नीलपताका " | उं वह्निवासिनी " |
| ऐं विजया नित्या " | ईं भेरुण्डा " |
| ओं सर्वमङ्गला " | इं नित्यक्लिन्ना " |
| औं ज्वालामालिनी " | आं भगमालिनी " |
| अं चित्रानित्या " | अं कामेश्वरी " |
| अः त्रिपुरसुन्दरीमहा" | अः त्रिपुरसुन्दरीमहा " |

इति विन्यस्य त्रिकोणस्य पृष्ठभागे रेखात्रयं विभाव्य तत्र गुरुपङ्क्तित्रयं पादुकात्रयमपि न्यसेत् । तद्यथा—

ॐ नारायणादि सप्तदिव्यौघेभ्यो नमः इति प्रथमरेखायाम्
ॐ गौडपादाचार्यादि त्रय सिद्धौघेभ्यो नमः द्वितीय "
ॐ विश्वरूपाचार्यादि चतुर्मानवौघेभ्यो नमः तृतीय "

ततो हृदयत्रिकोणस्याष्टकोणस्य चोत्तराल्लेषु षडंगयुवतीर्विन्यसेत तद्यथा

ॐ कएइलह्रीं सर्वज्ञाशक्तिधाम्ने हृदयदेव्यै नमः दक्षस्तने
हसकहलह्रीं नित्यतृप्तशक्तिधाम्ने शिरोदेव्यै " वामस्तने
सकलह्रीं अनादिबोध " " शिखा " " दक्षगले
क....ह्रीं स्वतन्त्रा " " कवच " " वामगले
ह....ह्रीं नित्यमलुप्त " " नेत्र " " गलौर्ध्वे
स.... ह्रीं अनन्त " " अस्त्र " " गलोर्ध्वे
(१५)क... श्रीमहात्रिपुरसुन्दर्यै " हृदये

एवं विन्यस्य

बिन्दुचक्रमध्ये देव्युपरि वृत्ताकारेण पंचपंच देवता विन्यसेत तद्यथा

प्रथमपञ्चकम्

ॐ मूलं श्रीविद्यालक्ष्म्यंबा देव्यै नमः
" लक्ष्मी लक्ष्म्यंबा " "
" महालक्ष्मी लक्ष्म्यंबा " "
" त्रिशक्ति लक्ष्म्यंबा " "
" साम्राज्य लक्ष्म्यंबा " "

द्वितीयपंचकम्

ॐ मूलं श्रीविद्या कोशाम्बा " "
" परंज्योतिः कोशाम्बा " "
" परीनिष्कलाशांभवी " "
" अजपाकोशांबा " "
" मातृका " " "

तृतीयपंचकम्

३ मूलं श्रीविद्याकल्पलताम्बा देव्यै नमः
" पंचकामेश्वरी कल्प " " "
" पंच कल्पलतेश्वरी " " "
" कुमारीकल्पलताम्बा " "
" पंचबाणेश्वरीकल्पलताम्बा " "

चतुर्थपञ्चकम्

४ मूलं श्रीविद्याकामदुघांबा देव्यै नमः
" अमृतपीठेश्वरीकामदुघाम्बादेव्यै नमः
" सुधासू कामदुघांबादेव्यै नमः
" अमृतेश्वरी कामदुघांबा देव्यै नमः
" अन्नपूर्णादुघांबा देव्यै नमः

पंच पंचकम

४ मूलं श्रीविद्यारत्नाम्बायै नमः
" सिद्धलक्ष्मीरत्नांबायै "
" मातंगी रत्नांबायै "
" भुवनेश्वरी " "
" वाराही " "

ततो वक्ष्यमानेषु स्थानेषु षड्दर्शनदेवताः विन्यसेत् " तद्यथा

४ बौद्धदर्शन देवता तारायै नमः दक्षांसपृष्ठतो हृदयावधि
वैदिकदर्शन देवता ब्रह्मणे " दक्षकर्णपृष्ठतो "
शैवदर्शनदेवता रुद्राय " दक्षशंखतो "
सौरदर्शन " सूर्याय " दक्षगलतो "
वैष्णव दर्शनदेवतायै विष्णवे " दक्षभालादि हृदयान्तम्
शाक्तदर्शन " भुवनेश्वर्यै " चिबुकादि "

ततो बिन्दुचक्रे एव चतुः समयदेवताः विन्यसेत्। तद्यथा-

४मूलं कामेश्वरीसमयदेवतायै नमः

" वज्रेश्वरी " "

" भगमालिनी " "

" श्रीमहात्रिपुरसुन्दरी " " इति विन्यस्य

४ हसकल हसकहल सकलह्रीं इति व्यापकं सर्वाङ्गे।

४ मूलं महोड्याणपीठनिलय सर्वचक्रेश्वरीध्यातपंच श्रीपंचकोशपंचकल्पलतापंचकामदुघ्या पंच-रत्नबृन्दमण्डितासनसंस्थित, सर्वदर्शनसेवित-षडङ्गयुवतीस्तुत, चतुःसमयदेवतापूजित महा-सौभाग्यजनन महामोक्षप्रद शून्याशून्यविवर्जित शक्ति सच्चिदानन्द परब्रह्म श्रीमन्महात्रिपुरसुन्दरी श्रीपादुकायै नमः इति मूर्धादिपादपर्यन्तं त्रिर्व्यापकं न्यसेत्॥

ततो

ब्रह्मरन्ध्रे स्वगुरुपादुकां विन्यस्य मूलाधारे स्वगुरुकृत-स्वनाम विन्यस्य तत्रैव महाकामकलां ध्यायेत्॥

इति

संहार - श्रीचक्रन्यासः

## सृष्टि श्रीचक्रन्यासः

तत्र शिरसि त्रिकोणं विभाव्य

ॐ तुरीयाविद्यामुच्चार्य सर्वानन्दमयचक्राय नमः इति व्यापकं विन्यस्य तत्र शिरस्त्रिकोणस्य महाबिन्दौ तुरीयविद्यामुच्चार्य ब्रह्मचक्रे महोड्यान पीठनिलय सर्वचक्रेश्वरी ध्यान, पंचश्री, पंचकोश, पंचकल्पलता, पञ्च कामदुघा पंचरत्न बृन्दमण्डितासनसंस्थित सर्वदर्शनसेवित षडङ्ग-युवतीस्तुत चतुः समयदेवतापूजित महासौभाग्यजनक महामोक्षप्रद शून्याशून्यविवर्जितशक्ति सच्चिदानन्द परब्रह्मश्रीमन्महात्रिपुर-सुन्दरी श्री पादुकायै नमः इति मूर्धादि पादपर्यन्तं त्रिव्यापकं विन्यस्य

भ्रूमध्ये मूलविद्यामुच्चार्य समस्तचक्रेश्वरी महात्रिपुरसुन्दरीदेव्यै नमः

तस्या दक्षिणे ॐ सर्वकामसिद्ध्यै नमः

वामे ॐ ह्स्रैं ह्स्क्लरीं ह्स्रौः त्रिखण्डामुद्रायै नमः

पुनः तस्या दक्षिणे ॐ प्राप्तिसिद्ध्यै नमः

" वामे ॐ सर्वयोनि मुद्रायै नमः

इति विन्यस्य एषा परापराति रहस्ययोगिनी सर्वानन्दमये महाचक्रे परब्रह्मस्वरूपिणी परामृतशक्ति सर्वमन्त्रेश्वरी सर्वविद्येश्वरी सर्व-पीठेश्वरी सर्ववीरेश्वरी सर्वयोगीश्वरी सर्वसिद्धेश्वरी सकलजगदुत्पत्ति मातृका सचक्रा सदेवता समुद्रा ससिद्धिः सायुधा, [भासना] सवाहना सपरिवारा सालंकारा सर्वोपचारैः श्रीमहात्रिपुरसुन्दरी परया चापरया परापरया च सपर्यया संपूजिता न्यस्तास्तु नमः

ततः शिरस्त्रिकोणपृष्ठभागे रेखात्रयं विभाव्य तत्र पूजाप्रकरणे वक्ष्यमाण
गुरुपंक्तित्रयं न्यसेत्। ततः पूर्ववत् षोडशनित्याः (     ) विन्यस्य॥
४ ह्स्रैं ह्स्क्ल्रीं ह्स्रौः मध्यत्रिकोणाय सर्वसिद्धिप्रदचक्राय नमः इति पादके विन्यस्य
त्रिकोणस्याष्टकोणयोः अन्तरालेषु प्रागुक्ता आयुधदेवता न्यसेत्। तद्यथा –

दक्षनेत्रे ४ द्रां द्रीं क्लीं ब्लूं सः सर्वजंभनेभ्यः कामेश्वरबाणेभ्यो नमः
वामनेत्रे ४ यां रां ल्वां वां शां सर्वजंभनेभ्यः कामेश्वरी " "
दक्षभ्रुवि ४ धं सर्वमोहनाय कामेश्वरचापाय नमः
वामभ्रुवि ४ थं सर्वमोहनाय कामेश्वरी " "
दक्षकर्णे ४ आं वशीकरणाय कामेश्वर पाशाय "
वामकर्णे ४ आं वशीकरणाय कामेश्वरी " "
दक्षनासायां ४ क्रों स्तंभनाय कामेश्वर अंकुशाय "
वामनासायां ४ क्रों स्तंभनाय कामेश्वरी " "

इति आयुधदेवता विन्यस्य त्रिकोणस्य कोणत्रये

४ कएईलह्रीं अग्निचक्रे कामगिरिपीठे मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठायिने
इच्छाशक्त्यात्मक रुद्रात्मशक्ति श्रीकामेश्वरी देव्यै नमः त्रिकोणस्याग्रकोणे
४ हसकहलह्रीं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मके स्वप्नदशाधिष्ठायके
ज्ञानशक्त्यात्मक विष्ण्वात्मक शक्ति श्री वज्रेश्वरीदेव्यै नमः त्रिकोणस्यवामकोणे
४ सकलह्रीं सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके
क्रियाशक्त्यात्मक ब्रह्मात्मकशक्ति श्री भगमालिनी देव्यै नमः दक्षकोणे
४ ह्स्रैं ह्स्क्ल्रीं ह्स्रौः त्रिपुरांबिकासर्वसिद्धिप्रदचक्रेश्वर्यै नमः हृदये॥ इति विन्यस्य
तस्या दक्षिणे ४ इच्छासिद्ध्यै नमः
वामे ४ ह्सौं सर्वबीजमुद्रायै नमः इति विन्यस्य
४ एताः परापररहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्राः ससिद्धयः

सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः न्यस्तः सन्तु नमः
इति व्यापकं कुर्यात् ॥

ततः ४ ह्रीं श्रीं सौः अष्टकोणाय सर्वरोगहराय चक्राय नमः इति व्यापकं विन्यस्य।
शिरः पुरोभागमारभ्य मुण्डमालाक्रमेण प्रादक्षिण्येन अष्टसु स्थानेषु पूर्वोक्तं वशिन्यादि वाग्देवताष्टकं मणिपूरके चक्रे पूर्वोक्तां त्रिपुरासिद्धाचक्रेश्वरीं विन्यस्य। तद्दक्षिणवामयोः भुक्तिसिद्धिं खेचरीमुद्रां च विन्यस्य।

४ एताः रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्राः इत्यादि व्यापकं न्यसेत्।

ततः ४ ह्रीं क्लीं अन्तर्दशारचक्राय सर्वरक्षाकरचक्राय नमः इति व्यापकं विन्यस्य

| | |
|---|---|
| ४ मं सर्वज्ञादेव्यै नमः | दक्षनेत्रमूले |
| यं सर्वशक्तिदेव्यै नमः | दक्षापाङ्गे |
| रं सर्वैश्वर्यप्रदायिनी देव्यै नमः | दक्षश्रोत्रे |
| लं सर्वज्ञानमयी देव्यै " | दक्षश्रोत्रपृष्ठे |
| वं सर्वव्याधिविनाशिनीदेव्यै " | दक्षचूडे |
| शं सर्वाधारस्वरूपादेव्यै " | वामचूडे |
| षं सर्वपापहरा " " | वामश्रोत्रपृष्ठे |
| सं सर्वानन्दमयी " " | वामश्रोत्रे |
| हं सर्वरक्षास्वरूपिणी " " | वामापाङ्गे |
| क्षं सर्वेप्सितफलप्रदादेव्यै " | वामनेत्रमूले इति विन्यस्य |

स्वाधिष्ठानचक्रे पूर्वोक्तां त्रिपुरामालिनी चक्रेश्वरीं विन्यस्य

तद्दक्षिणवामयोः प्राकाम्यसिद्धिं महांकुशमुद्रां प्राग्वत् विन्यसेत्॥
ततः ४ एताः निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्राः इत्यादि व्यापकं विन्यसेत्।

ततः ह्सैं हस्क्लीं ह्सौः बहिर्दशारचक्राय सर्वार्थसाधकचक्राय नमः इति व्यापकं विन्यस्य।
कण्ठे विशुद्धिचक्रे षोडशदलेषु एकस्मिन्[1], त्रये[2] पुनः एकस्मिन्[3] त्रये[4], पुनः एकस्मिन्[5], त्रये[6] इति एकैकां शक्तिं विन्यस्य अवशिष्टचतुर्दले अवशिष्ट चतुः शक्तीः न्यसेत्॥ एवं प्रादक्षिण्ययेन सर्वसिद्धिप्रदादि दशशक्तीः विन्यस्य मूलाधारे त्रिपुराश्री चक्रेश्वरीं प्राग्वद् विन्यस्य तद्दक्षिणवामयोः वशित्वसिद्धिं उन्मादिनीमुद्रां च प्राग्वत् विन्यस्य
४ एताः कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्राः इत्यादि व्यापकं न्यसेत्

ततः ह्रैं हस्क्लीं ह्सौः चतुर्दशारचक्राय सर्वसौभाग्यदायकचक्राय नमः इति व्यापकं विन्यस्य
हृदये अनाहतचक्रे द्वादशदलकमल दशदलेषु सर्वसंक्षोभिण्यादि दशशक्तीः विन्यस्य अन्तिमदलद्वये प्रतिदलं शक्तिद्वयं शक्तिद्वयमिति शिष्टशक्तिचतुष्टयं विन्यस्य॥
ऊरुद्वये पूर्वोक्तां त्रिपुरवासिनीं चक्रेश्वरीं प्राग्वत् विन्यस्य। तद्दक्षवामयोः ईशित्वसिद्धिं वशंकरीमुद्रां च प्राग्वद् विन्यस्य।
४ एताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः इत्यादि व्यापकं न्यसेत्

ततः ॐ ह्रीं क्लीं सौः अष्टदलाय सर्वसंक्षोभण चक्राय नमः इति व्यापकं न्यस्य

ॐ कं … गं अनंगकुसुमायै नमः पृष्ठवंशे
चं … ञं अनंगमेखलायै " वामपार्श्वे
टं … णं अनंगमदनायै " उदरे
तं … नं अनंग मदनातुरायै " दक्षपार्श्वे
पं … मं अनंगरेखायै " पृष्ठवामपार्श्वयोर्मध्ये
यं … वं अनंगवेगिन्यै " वामपार्श्वउदरयोर्मध्ये
शं … हं अनंगांकुशायै " उदरदक्षिणपार्श्वयोर्मध्ये
ळं क्षं अनंगमालिन्यै " दक्षिणपार्श्वपृष्ठवंशयोर्मध्ये

इति विन्यस्य

ॐ एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणे चक्रे समुद्राः इत्यादि व्यापकं न्यसेत्

ततः ॐ ऐं क्लीं सौः षोडशदलचक्राय सर्वाशापरिपूरक चक्राय नमः इति व्यापकं विन्यस्य

स्वाधिष्ठाने षड्दलकमलेष्वादि प्रादक्षिण्येन पंचसु दलेषु प्रतिदलं शक्तित्रयं अन्तिमदले एकां शक्तिमिति कामाकर्षिण्यादि षोडशशक्तीर्विन्यस्य। जंघयोः पूर्वोक्तां त्रिपुरेश्वरीं विन्यस्य तद्दक्षिणवामयोः लघिमा सिद्धिं विद्राविणीं च मुद्रां विन्यस्य

ॐ एताः गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्राः इत्यादि व्यापकं न्यसेत्॥

ततः ४ अं आं सौः चतुरस्राय त्रैलोक्यमोहनचक्राय नमः इति व्यापकं विन्यस्य
अन्तःचतुरस्ररेखायै नमः इति व्यापकं विन्यस्य
मूलाधारे चतुर्दलकमलस्य दलचतुष्टये तदन्तरालचतुष्टये
पूर्वदलेशानान्तरालयोर्मध्ये पश्चिमदल नैरृत्यन्तरालयोर्मध्ये
च पूर्वोक्त संक्षोभिण्यादि मुद्रादशकं न्यसेत् । ततः—
मध्यचतुरस्ररेखायै नमः इति व्यापकं विन्यस्य

दक्षिणजंघायाः पश्चिमादि चतुर्दिक्षु वायव्यादि चतुष्कोणेषु
प्रादक्षिण्येन ब्रह्माण्याद्या अष्टौ विन्यसेत्.
बाह्यचतुरस्ररेखायै नमः इति व्यापकं विन्यस्य
वामजंघायां दिक् विदिक् क्रमेण अणिमादिसिद्ध्यष्टकं विन्यस्य
दक्षपादे प्राप्तिसिद्धिं वामपादे सर्वकामसिद्धिं विन्यस्य
४. (एताः) प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे समुद्राः इत्यादि व्यापकं विन्यस्य

स[illegible]मिकं श्री महात्रिपुरसुन्दर्यभेदेन स्वात्मानं ध्यायेत्

इति

सृष्टि श्री चक्र न्यासः

## स्थिति श्रीचक्रन्यासः

एषन्यासः विद्या-चक्र-चक्रेश्वरीत्यंगत्रयात्मकः। तत्र प्रथमं संप्रदायात् पूर्ववत् करशुद्धिं विधाय। तथैव तां विन्यस्य तथैवात्मरक्षां कृत्वा न्यासमारभेत्। ततः आदौ विद्यान्यासः। तद्यथा–

मूर्ध्नि ४ प्रथमकूटं नमः
गुह्ये " द्वितीयकूटं "
हृदये " तृतीय कूटं "
दक्षनेत्रे " प्रथम " "
वामनेत्रे " द्वितीय " "
भाले " तृतीय " "
दक्षकर्णे " प्रथम " "
वामकर्णे " द्वितीय " "
मुखे " तृतीय " "
दक्षांसे " प्रथम " "
वामांसे " द्वितीय " "
पृष्ठे " तृतीय " "
दक्षजानुनि " प्रथम " "
वामजानुनि " द्वितीय " "
नाभौ " तृतीय " "
पादयोः " अं आं सौः नमः
जंघयोः " ऐं क्लीं सौः "
जान्वोः " ह्रीं श्रीं सौः "
ऊर्वोः " हैं ह्क्लीं सौः "

स्फिचयोः ४ हसैं हस्क्लीं हसौः नमः
लिङ्गाग्रे " ह्रीं क्लीं ब्लें नमः
मूलाधारे " ह्रीं श्रीं सौः नमः

इति मूर्तिविद्यां विन्यस्य तस्यां हस्रैं हस्क्लरीं हस्रौः नमः इति आवाहनीविद्यां विन्यस्य मूलविद्यया मूर्धादिपादान्तं पादादि मूर्धान्तं व्यापकं न्यसेत् ॥ ततः

मूलाधाराधः स्थितोर्ध्वमुखरक्तसहस्रदलकमलकर्णिकायां

४ अं आं सौः त्रैलोक्यमोहनचक्राय नमः

मूलाधारे ४ ऐं क्लीं सौः सर्वाशापरिपूरक " "
स्वाधिष्ठाने ४ ह्रीं क्लीं सौः सर्वसंक्षोभन " "
मणिपुरे ४ हैं ह्क्लीं ह्सौः सर्वसौभाग्यदायक चक्राय नमः
अनाहते ४ हसैं हसक्लीं हसौः सर्वार्थसाधक " "
विशुद्धौ ४ ह्रीं क्लीं ब्लें सर्व रक्षाकर " "
लम्बिकाग्रे ४ ह्रीं श्रीं सौः सर्वरोगहर " "
आज्ञायां ४ हस्रैं हस्क्लरीं हस्रौः सर्व सिद्धि प्रद " "
बिन्दौ ४ मूलं सर्वानन्दमयचक्राय नमः

इति नव चक्राणि विन्यस्य नवचक्रेश्वरी न्यासं कुर्यात् ।

तत्र मूलाधाराधः प्राङ् न्यस्त त्रैलोक्य मोहन चक्रे

४ अं आं सौः त्रिपुराचक्रेश्वर्यै नमः

मूलाधारस्थ सर्वाशापरिपूरकचक्रे

४ ऐं क्लीं सौः त्रिपुरेशीचक्रेश्वर्यै "

स्वाधिष्ठानस्थित सर्वसंक्षोभणचक्रे

४ ह्रीं क्लीं सौः त्रिपुरसुन्दरीचक्रेश्वर्यै नमः

४ मणिपूरस्थितं सर्वसौभाग्यदायकेचक्रे ४ हैं हस्क्लीं ह्सीः त्रिपुरावासिनी चक्रेश्वर्यै नमः
अनाहतास्थित सर्वार्थसाधक चक्रे ४ हसैं हस्क्लीं ह्सौः त्रिपुराश्री-चक्रेश्वर्यै नमः
विशुद्धिस्थित सर्वरक्षाकर चक्रे ४ ह्रीं क्लीं ब्लें त्रिपुरमालिनी चक्रेश्वर्यै नमः
लंबिकाग्रस्थित सर्वरोगहरचक्रे ४ ह्रीं श्रीं सौः त्रिपुरासिद्धा चक्रेश्वर्यै नमः
आज्ञाचक्रस्थ सर्वसिद्धिप्रदचक्रे ४ हसैं हस्क्लीं ह्सौः त्रिपुरांबिका चक्रेश्वर्यै नमः
महा बिन्दुस्थ बिन्दुचक्रे सर्वानन्दमयचक्रे ४ मूलं
महात्रिपुरसुन्दरी महाचक्रेश्वरी श्रीपादुकायै नमः
इति विन्यस्य

ततश्चक्रे परस्परसंलग्न तत्तच्चक्रेश्वर्याधिष्ठितां सम्यक् ध्यात्वा पुनः करशुद्धिं विधाय विन्यस्य ॥

वाग्भवं मूलाधारे कामराजं हृदये तृतीयं भ्रूमध्ये तुरीयविद्यां ब्रह्मरन्ध्रे विन्यस्य

४ समस्त प्रकट गुप्त गुप्ततर संप्रदाय कुलकौल निगर्भ रहस्य परापररहस्य परातिरहस्य श्रीचक्रयोगिनी श्रीपादुकेभ्यो नमः इति स्वशरीरं चक्ररूपं ध्यायन् व्यापकं कुर्यात् ॥

इति
स्थिति श्री-चक्रन्यासः

## श्रीचक्रलेखनोपायः

अत्रेयं परिभाषा–

ईशानादाग्नेय्यान्ता वायव्यादि नैर्ऋत्यन्ता वा रेखा तिर्यग्रेखा इति उच्यते। तस्या एवाग्रद्वयादाकृष्टे प्रतीच्यां वा मेलिते च पार्श्वरेखेत्युच्यते। रेखोपरि रेखान्तरस्थापने तयोर्योगस्थानं सन्धिः। ईदृशः रेखात्रययोगो मर्म। साधको यदाऽभिमुखः सैव प्राची। तदितरा प्रतीची। प्रत्यगग्रं त्रिकोणं शक्तिः प्रागग्रं तु शिवो वह्निश्चेत्युच्यते इति

प्रथमं ईशानाद्याग्नेयान्त – तवादिवारुण्यन्त – तदादीशानान्तां रेखामभिलिख्य शक्ति निष्पादयेत्। इदं मध्यत्रिकोणं भवति॥ यन्मध्यं हि बिन्दुस्थानमामनन्ति। अथास्यमध्यतः पार्श्वरेखाद्वयनिर्भेदपूर्वकं प्रागवच्छक्त्यन्तरं कल्पयेत्। अत्र सन्धिद्वयं जायते ततो द्वितीयशक्तिमध्यतः तत्पार्श्वरेखाद्वयं निर्भिद्य च तां प्रथमशक्त्यग्रसंलग्नां तिर्यग्रेखामालिख्य तदग्राकृष्टाभ्यां पार्श्वरेखाभ्यां सन्धिद्वयभेदनं शिवत्रिकोणं कुर्यात्। एतावता अष्टकोणं संपद्यते॥ एतदेव मध्यत्रिकोणेन सह नवयोनिचक्रमिति कीर्त्यते। इह सन्धयः षट् मर्माणि द्वे च सिध्यन्ति। अथ प्राचीं तिर्यग्रेखामुभयतोऽप्यभिवर्ध्य तदग्राकृष्टाभ्यां प्रथमवह्निपक्षकोणाग्रसंलग्नाभ्यां पार्श्वरेखाभ्यां शक्तिं जनयेत्। एवं प्रतीचीं तिर्यग्रेखामुभयतोऽप्यभिवर्ध्य तदग्राकृष्टाभ्यां प्रथमशक्तिपक्षकोणाग्रस्पृष्टाभ्यां। पार्श्वरेखाभ्यां शिवं साधयेत्। ततो मध्यत्रिकोणपार्श्वरेखे ऐशान्यां आग्नेय्यां चाभिवर्ध्य तदग्रयोः प्रथमालिखितवह्न्यग्रे च संसक्तां तिर्यग्रेखामालिखेत्। एवं प्रथमालिखितवह्नेरपि पार्श्वरेखे अभिवर्ध्य तदग्रयोः द्वितीयशक्त्यग्रे च संसक्तां तिर्यग्रेखां विलिखेत्। तदिदं अन्तर्दशारं भवति॥ अत्र मर्माणि षट् सन्धयो द्वादश च

निष्पद्यन्ते । अथ विद्यमानासु च पञ्चसु तिर्यग्रेखासु प्रथमां चरमां च उभयतोऽप्यभिवर्ध्य तत्तदग्राकृष्टाभिः पार्श्वरेखाभिः तृतीयशक्तिपक्षकोणशिखावर्जं इतरकोणाष्टकाग्रमर्शिनौ शक्तिशिवौ समुत्पादयेत्। ततः प्रथमवर्धिता मध्यशक्तिप्रथमवह्निपार्श्वरेखास्तत्तद्दिक्षु संवर्ध्य तत्तदग्राकृष्टे अन्तर्दशारीय प्राक्प्रत्यक्कोणशिखासंपृक्ते रेखे समालिखेत्। तदेतद् बहिर्दशारं भण्यते ॥ इह मर्माणि दश सन्धयोऽष्टादश चोन्मीलन्ति । अथ सप्तसु तिर्यग्रेखासु षष्ठद्वितीये पूर्वसंवर्धिते एव रेखे उभयतः संवर्ध्य तत्तदग्राकृष्टाभिः बहिर्दशारस्य प्राक्-प्रत्यक्-त्रिकोणशिखरसंसर्गवर्जमितरकोणाष्टकशिखरसंपृक्ताभिः पार्श्वरेखाभिः शक्तिं शिवं च समुन्मीलयेत् । ततश्चतुर्थशक्तिपार्श्वरेखे सर्वप्राचीनां तिर्यग्रेखां चोभयतोऽप्यभिवर्ध्य मेळनम्। एवं तृतीयवह्निपार्श्वरेखे सर्वप्रतीच्यां तिर्यग्रेखां चोभयतः संवर्ध्य मेलयेत्। ततः प्रथमशक्तिप्रथमशिवयोः पार्श्वरेखे द्वे तत्तद्दिक्षु समभिवर्ध्य तत्तदग्रतश्चतुर्थशक्तितृतीयशिवशिखरचुम्बि तिर्यग्रेखायुगलमालिखेत्। तदिदं चतुर्दशारं भवति ॥ अत्र मर्माणि अष्टादश, सन्धयः चतुर्विंशतिः, शक्तयः पञ्च, वह्नयश्चत्वारः, पार्श्वयोः डपरवोऽष्टौ, त्रिकोणानि च संहृत्य त्रिचत्वारिंशत् संपद्यन्ते। अथास्य परितः कर्णिकावृत्तं विलिख्य तत्संसक्तान्यसन्धीनि दलान्यष्टौ कल्पयेत्। तदिदमष्टदलमिति व्यवह्रियते। असन्धित्वं नाम केसराभावत्वम्, श्रीचक्रराजे केसरनिषेधदर्शनात्। अथ तदभितः पुनः कर्णिकावृत्तं निष्पाद्याऽसन्धीनि पत्राणि षोडश

निर्मिमीत। तदिदं षोडशदळं संजायते। अथ तद्बहिर्मर्यादावृत्तत्रयं परिकल्प्य तत्परितः चतुरस्ररेखात्रयेण चतुर्द्वारं भूपुरं समुद्भावयेत्॥

इति
श्री चक्रलेखनप्रकारः

## श्री-चक्र प्रस्तार भेदाः

सुवर्णादि निर्मितस्य यन्त्रस्य तु द्वौ प्रस्तारौ - भौमो, मैरवश्च इति। तत्र पलद्वयपरिणामे चतुरंगुलविस्तृतपट्टे ऊर्ध्वरेखात्मको बिन्द्वादिभूपुरान्त रचनक्रमो भूप्रस्तारः। मैरवप्रस्तारस्त्रिविधः। तत्र भूपुरमारभ्य चक्रत्रिकत्रिकं सृष्टिस्थिति संहारपदैः व्यपदिश्यते। तेषु सृष्टि चक्रात् स्थितिचक्रमुन्नतं ततोऽपि संहारचक्रमुच्छ्रितम्। इत्येकः पक्षः। भूपुरात् पद्मद्वयमुन्नतम्। तस्मात् चतुर्दशारादिषट्कं उदग्रमिति द्वितीयः। भूपुरादिबिन्द्वन्तानि नवापि चक्राणि पूर्वपूर्वस्मादुत्तरोत्तरं उन्नतानीति तृतीयः। अत्र—

चतुरस्रं समारभ्य नवचक्राण्यनुक्रमात्
उन्नतोन्नतमामध्याच्चक्रं स्यान्निधनेधनम्॥ इति।

चरमपक्षप्रतिपादके तन्त्रराजवचनगते 'निधनेधनं' इति पदे "उरसि लोम" इत्यादिवत् व्यधिकरणबहुव्रीहिः। चरमे वयसि धनप्राप्तिरित्यर्थः। संपदनुभवदशायामेव निधनमाप्नोति न तु तद्ध्रासकाले इतियावत्। प्राञ्चस्तु धनलाभोत्तरं निधनं भवतीति सप्तमीद्वितीययोः व्यत्ययं विधाय निन्दापरतया व्याचक्षते। तत्र मूले त एव जानत इति दिक्॥

# श्री चक्र महिमा


श्री चक्राभिषोदकेन शिरः प्रोक्षणं पानं च ब्रह्माण्डोदरगत गङ्गादि तीर्थसहस्र स्नान कोटि-फलदम् । श्री चक्रदर्शिनस्तु -


सम्यक् शतक्रतून् कृत्वा
यत्फलं समवाप्नुयात् ।
तत्फलं लभते कृत्वा
भक्त्या श्रीचक्रदर्शनम् ॥


इति वचनादुक्तं फलं भवति । इत्यलं विस्तरेण

शिवम्

--









MATHI COLOURS
Nallur 021 2229285